गुणितानि ३७८४ अशीति८०त्या भक्तानिलब्धपलानि ४७ ऋणानिदेशांतरस्थ ऋणसंज्ञकत्वात् तिथौविपरीतमित्युक्तत्वात् जातानिधनानि ॥रे
खापुरात्स्वपुरस्थप्रागपरदिग्वास्थित्याऋणधनत्वमवगंतव्यं ॥ यस्मिन्वर्षेशुद्ध्यंकएकविंशतिमारभ्यत्रिंशत्पर्यंतंसमायाति ॥ तस्मिन्वर्षेधिमा

सोज्ञेयः ॥ तद्यथा ॥ इष्टशके १५५२ ॥ एतन्मध्ये पुस्तकीयशके १५४४ शोधितशेषं ८ शेषादधस्यातिथिः २८ शकादधस्यातिथिः २७ योगः ५५ त्रिं-
शल्पेशेषं २५ अस्मिन्वर्षेधिमासोज्ञेयः ॥ संक्रमणवशात् मासोज्ञेयः ॥ यस्मिन्मासे संक्रांतिर्न भवति स अधिमासः ॥ अथ उदाहरणक्रमो लिख्य-
ते ॥ इष्टशकः १५५२ एतन्मध्ये पुस्तकीयशकः शोधितःशेषं ॥ ७ ॥ पुस्तकीयशकादधस्यांकः २७।५।२६।१५ शेषादधस्यांकः १७।१।२१।५२ अन
योर्योगेजातं ॥ १५।६।४८।३७ इदं देशांतरपलैः ४७ सहितं जातं वर्षादौ तिथ्यादिकं । १४।६।४१।२४ एवं चैत्रशुद्धचतुर्दशी शुक्रवारमारभ्य वर्षप्रवृ-
त्तिः ॥ शकादधस्यवल्ली ५५।३६।३४ शेषादधस्यवल्ली ४६।२८।१५ अनयोर्योगे जाता वर्षादौ वल्ली ४१।४।४१ एवं कृता इति इदं वारादिकं वल्लीसहितं
पंचविंशतिधास्थाप्यं ॥ अथानुक्रमेण तत्तत्पक्षस्थतिथिमुच्छ्वायोज्याः ॥ तद्यथा ॥ प्रथमस्थाने शून्यकोष्ठकाधस्थं वारादिकं योज्यं ॥ ०।०।० तदधस्था
वल्ली ०।०।० वल्लीषु योज्या ॥ एवं द्वितीयस्थाने प्रथमकोष्ठकाधस्थं वारादिकं ॥ ०।४५।३६ योज्यं तदधस्था वल्ली ३२।८।२३ वल्लीयोज्या ॥ एवमग्रेपि ए-
वं कृते सति तत्तत्पक्षादौ तत्तद्वारादि भवति ॥ तथा कृते जातं प्रथमपक्षस्थं वारादिकं ६।४१।२४ वल्ली ४१।४।४१ द्वितीयपक्षस्थं वारादिकं ०।
२५।१० वल्ली १३।१३।१२ तृतीयपक्षस्थवारादिकं १।१३।५६ वल्ली ४५।२०।१६ एवमग्रेपि चतुर्विंशतिपक्षाः भवंति ॥ अधिमासश्चेत्पट्विंशति प-
क्षा भवंति ॥ इति नियामकत्वाद्न एकस्थानमधिकं ॥ किमर्थमुक्तमिति चेदुच्यते ॥ इष्टवर्षादिमारभ्य द्वादशमासांते अधिमासश्चेत् त्रयोदश
मासांतिवर्षसमाप्तिर्भवति ॥ अस्माद्द्वितीयदिवसे अधिमसौरवर्षप्रवृत्तिर्न भवति किंतु एकादशदिनांतरे भवति ॥ इति कारणादेकपक्षस्य चा
लनमंतरास्तद्दिवसज्ञानार्थमधिकमुक्तं ॥ अनयारीत्या प्रतिवर्षं एकादशतिथिवृद्धिः ॥ अनयारीत्या एकादशदिनवृद्ध्या तृतीये वर्षे अधिमासो
नभवति ॥ अथ तत्तत्पक्षस्थवारादौ तत्तत्पक्षचालनानि रहितानि तानि कार्याणि कुतः चालकस्य ऋणत्वात् ॥ तत्तत्पक्षादि-

स्यवल्लीपुवल्लीस्थचालनानि धनानि कार्याणि चालनस्य धनत्वात् ॥ तद्यथा ॥ प्रतिपक्षपंचदशकोष्ठकाः कार्याः ॥ तत्र प्रथम कोष्ठकस्थ ति-
थिवारेषु एको योज्यः ॥ तद्यथा ॥ प्रथमकोष्ठकस्थ तिथिवारौ तावेव तयोर्मध्ये एको युक्तः कार्यः द्वितीयकोष्ठस्थ तिथिवारौ भवतः ॥ एवं
द्वितीयकोष्ठस्थतिथिवारमध्ये एको युक्तः तृतीयकोष्ठस्थ तिथिवारौ भवतः ॥ एवमग्रेपि ॥ प्रथमकोष्ठस्थवारादिमध्ये अयं घट्यादि चा-
लनांको० ।५७।३६ घटीस्थाने रहितः कार्यः तदा द्वितीयकोष्ठस्थ घट्यादिकं भवति ॥ प्रथमकोष्ठे यथास्थितमेव ॥ एवमग्रेपि ॥ तथा प्रथम-
कोष्ठकस्थवल्ली यथास्थितैव ॥ तन्मध्ये चालनांको २।८।३३।३२ योजितः ॥ द्वितीयकोष्ठस्था वल्ली भवति ॥ एवमग्रेपि ॥ एवं कृते सति अं-
तिमकोष्ठस्थवारादिकं तेनैव चालकेन रहितं सत् द्वितीयपक्षस्य वारादिकतुल्यं भवति ॥ तदा शुद्धोयं क्रमः ॥ अन्यथा अशुद्धः । एवं वल्ली
॥ उदाहरणं ॥ प्रथमपक्षस्य वारादिकं १४।६।४९।२४ तिथौ वारे च एको युक्तः १५।० घटी ४९ ५० २४ एतन्मध्ये चालनांको० ५७
।३० रहितः जातं द्वितीयकोष्ठस्थं वारादिकं १५।०।४८।२६।५४ एवं प्रथमपक्षस्य वल्ली ४१।४।४१ मध्ये चालनांको २।८।३३।३२ युक्तः जाता द्विती
या वल्ली ४३।१३।१२।३२ एवमग्रेपि ॥ तथा कृते जातं ॥ एवं कृते द्वितीयपक्षस्थे तिथ्यादि तुल्यं ॥ षोडशकोष्ठकस्थ तिथ्यादिकं जातं ॥ अथ
वल्लीपऊर्ध्वकोष्ठजयति तत्तुल्यं तिथिसौरभस्य कोष्ठको ग्राह्यः वल्लीस्थोर्ध्वांकादधस्था या घटिका भवति ॥ तन्न्यूनं तदासन्नतियुक् पंक्तिस्थ
घटिकायां तत्कोष्ठकादधस्थ घटिकाभिः सहांतरं कार्यम् ॥ तद्धनर्णसंज्ञकं भवति ॥ यदा प्रथमस्य घटी मध्ये शुद्धं तदा धनसंज्ञकं अंत-
रं भवति ॥ अन्यथा ऋणसंज्ञकं भवति ॥ यदा चतुः पंचाशत्तिर्यक्पंक्तौ घटिकादिकं फलं गृहीतं ॥ तदा तदधो घटिकाया-
अभावात् ॥ केन सह अंतरं कार्यमित्याह ॥ तिर्यक्पंक्तौ शून्य घटिकायां वल्लीस्थोर्ध्वांकतुल्य कोष्ठकादधस्थ घटिकाभिः

३६	१५	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४
६ ४१ २४ ०	० ४८ २६ २४	१ ४७ २८ ४८	२ ४६ ३१ १२	३ ४५ ३३ ३६	४ ४४ ३६ ०	५ ४३ ३८ २४	६ ४२ ४० ४८	० ४१ १२ १२	१ ४० ४५ ३६	२ ३९ ४८ ०	३ ३८ ५० २४	४ ३७ ५२ ४८	५ ३६ ५५ १२	६ ३५ ५७ ३६	० ३५ ० ०
४१ ४ ४१ ०	४३ १३ १२ ३२	४५ २१ ५६ ४	३७ ३० २१ ३६	४१ ३१ ३ ८	५१ ४७ ३६ ४०	५३ ५६ १० १२	५६ ४ ४३ ४४	२८ १३ १७ १२	१ २१ ५८ ४८	२ ३० २४ २०	४ ३८ ५७ ५२	६ ४७ ३१ २४	८ ५६ ४ ५६	११ ४ ३८ ३८	१३ १३ १२ ०

सह्यंतरं कार्यमिति ॥ अत्रोदाहरणं ॥ वल्ली ५३।५६।१० त्रिपंचादशदधस्थतिर्यक् पंक्तौचतुः पंचाशत् घटिकायाः घटया-
दिकं ॥ ८।५२। चतुः पंचाशत् कोष्ठकादधस्थतिर्यक् पंक्तौशून्य घटिकाया घटयादिकं १।५ अनयोरंतरं १३ एवं बुद्धि-
मताज्ञेयं ॥ तदनंतरं तिर्यक् पंक्तौया घटिका गृहीता तावल्ली स्थ घटिकामध्ये शोध्याः शेषाया घटिकाःपलानि भवंतिते नांत-
रेणगुण्यानि पश्चात् षष्टिभिर्भक्तो लब्धानि एतानि पूर्वस्थापित घटिमध्ये रहितानि सहितानि कार्याणि तद्यथा ॥ यदा धनमं-
तरं तदासहितानि ऋणं तदा रहितानि कार्याणि ॥ एवंकृते या घटिकाः पलानि च भवंति ताः कोष्ठकस्थ घटीमध्ये योज्याः स्प-
ष्टा घटिका भवंति ॥ तिथिरेक वार मुल्लंघ्य द्वाग्रिमवार गच्छति तदा पूर्वस्मिन्वारे षष्टिघटिकात्मिका तिथिः स्थाप्या ॥ यदैक वारे
तिथिद्वयं भवेत्तदावमदिनं ॥ तदा पूर्वेना परा कार्या सास्पष्टा भवेत् ॥ अनया रीत्या नक्षत्र योगसाधनं ॥ अथउदा

	१४	१५	१	२	३	४	५	६	७	७	८	९	१०	११	१२	१३
वा०	शु०	श०	र०	चं०	मं०	बु०	बृ०	शु०	श०	र०	चं०	मं०	बु०	बृ०	शु०	श०
घ०	५२	४६	४७	४६	४७	४९	५२	५६	६०	१	६	११	१६	२०	२३	२४
प०	२४	२५	३३	५२	३०	३१	३५	४४	०	३३	४६	५४	३१	३२	१	३४

हरणं ॥ प्रथमपक्षस्य प्रथमकोष्ठस्थावल्ली ४१।४।४१ अत्रवल्ल्या मूर्ध्वांके एकचत्वारिंशद्वर्तते इति कारणात् तिथिसौर भस्यैकचत्वारिंशत्कोष्ठकादधस्थवल्ल्यां घटिका चतुष्टयं वर्तते इतिकारणात् तिर्यक्पंक्तौ शून्यघटिकाया घट्यांकः ३।५ अयं अधस्य घटिकामध्ये २।५८ नशुध्यति अतः अपूर्वघटिकामध्ये शोधितः ७ पलाद्यंऋणसंज्ञं ॥ अवांतरे क्रियमाणे घटिस्थाने शून्यमेवावशिष्यते वल्लीस्थघटिकाशून्येन गुणिताः शून्यमिवजातं षड्भक्ते शून्यमितिकारणात् ॥ घटीस्थाने शून्यत्यागः क्रियते फलं पलात्मकमंतरं गृह्यते वल्लीस्थघटिकादिकं ४।४१ इदं तिर्यक्पंक्तिस्थशून्यघटीभी रहितं जातं ४।४१ इदं मंतरेण गुणितं ३३।४३ षड्भक्तं लब्धानि पलानि ५ एतानि पूर्वघटीमध्ये ३।५ रहितानि जातानि घटीपलानि ॥ ३।०। एतानि पूर्वस्थापित प्रथमपक्षस्य प्रथमकोष्ठघटीपलमध्ये ।४९।२४ । युतानि जातानि चैत्रशुद्ध १४ भृगौ घटीपलानि ।५२।२४ एवमग्रेपि बोध्यं तथा कृते जातः प्रथमः पक्षः एतदुदाहरणे परिगणकेन गणिते क्रियमाणे यत्र कुत्रापि अंकमध्ये अंतरं पत

निर्दिष्टमनदोषः अस्माभिः शुद्धपुस्तकोपरिक्तमस्ति ॥ अथनक्षत्रसाधनं ॥ इष्टशकमध्ये १५ । ५१ पुस्तकीयशकेशोधिते१५४४ शोधितेशेषं ७ शकादधस्यांकः २४ । ५ । ९ । ३८ शेषादधस्यांकः १६ । २ । ६ । २३ अनयोर्योगे जातं ४० । ७ । १६ । १ देशांतरपलैः ४७ सहितं ४० । ७ । १६ । ४८ उर्ध्वांकेसप्तविंशतिभिस्तष्टे जातं १३ तदधः सप्तनष्टेजातं० । एवंजातं १३ । ० । १६ । ४८ वर्षादौतिथ्यादिकं ॥ यस्मिन्दिनेतिथ्यारंभोभवति तस्मिन्नेवदिने नक्षत्रयोगारंभ इतिव्याप्तिर्नास्तीति ॥ तद्दिनात् पूर्वापरदिनेवा भवति ॥ चैत्रशुद्ध १५ शनौहस्तनक्षत्रप्रवृत्तिः ॥ शकादधस्यावल्ली ५३ । ५५ । २१ शेषादधस्यावल्ली ४८ । ५ । ९ योगः ४२ । ० । ३० जातानक्षत्रवल्ली इदं नक्षत्रादिकं वल्लीसहितं चतुर्दशस्थानेस्थाप्यं ॥ अधिमासश्चेत्पंचदशस्थानेस्थाप्यं ॥ अनुक्रमेणतत्तत्पक्षस्थनक्षत्रगुच्छायोज्याः ॥ तद्यथा ॥ प्रथमस्थानेशून्यकोष्ठकादधस्थं योज्यं ॥ द्वितीये प्रथमं ॥ एवमग्रेपि ॥ तदधस्थवल्लीषुयोज्या ॥ एवंकृतेजातं प्रथमपक्षस्थंवारादिकं ॥ ० । १६ । ४८ द्वितीयपक्षस्थं ६ । ३६ । ५८ प्रथमवल्ली ४२ । ० । ३० द्वितीयवल्ली ४१ । ३३ । ५७ । एवमग्रेपि ॥ अथतत्तत्पक्षादिषुवारादौ तत्तत्पक्षचालनानि सहितानिकार्याणि ॥ वल्लीषु चालनानि धनानिकार्याणिप्रतिपक्षंसप्तविंशतिकोष्ठकाः ॥ तत्र प्रथम कोष्ठे प्रथम कोष्ठस्थ नक्षत्रादिकंस्थाप्यं ॥ तदधस्थातत्तत्पक्षवल्लीः स्थाप्या ॥ तदनंतरं प्रथम कोष्ठस्थनक्षत्रादिकं यथास्थितमेव ॥ तन्मध्ये एकोयुक्तः कार्यः द्वितीयकोष्ठस्थ नक्षत्रवारौ भवतः ॥ एवमग्रेपि ॥ तथा प्रथमकोष्ठस्थ घटिकायथास्थिताएव ॥ तन्मध्ये अयंघटयादिश्चालनांको ० । ५४ । ४८ युक्तः सन् द्वितीयकोष्ठस्थंघटयादिकं भवति ॥ तथाप्रथमकोष्ठस्था वल्ली यथास्थितैव ॥ तन्मध्येयं घटयादिश्चालनांको २ । १३ । १६ यो-

र्याः ॥ वारस्थानेसप्तभिस्तष्टंकार्यं ॥ तदनन्तरंस्वस्वचालकाः शेषतिथ्यादिनागुण्याः ॥ चालकश्चेदृणस्तदाघटिस्थानेयुक्ताः कार्याः
॥ ऋणेरहितः यदानशुद्ध्यतितदावारादिकाग्राह्याः ॥ एवमेववल्ली ॥ एवंतिथिनक्षत्रयोगानांवारादिकंभवति ॥वल्लीसहितं ॥ अस्मा
न्नाप्यत्स्वस्वसौरस्त्रोपरिघटिकाः साध्याः अभीष्टतिथ्यादिःस्पष्टाघटिकाभवंति ॥ उदाहरणं ॥ शके१५५१ वैशाख कृष्ण १० घटया
दानयनं तत्र चैत्रशुद्ध १ प्रतिपदमारभ्य दशमीपर्यंतमिष्टतिथयः ॥२५ वर्षादितिथ्या१४हीना ११पंचदशाभिर्भक्ताः फलं० शेषं ११
तिथिगुच्छस्यंशून्यकोष्ठकादधःस्थंवारादिकं ॥०।०।० वल्लीच०।०।० इदंवर्षादिकं वारादिभिः ६।४९।२४ युतंवारस्थाने शेषतिः
थि११भिर्युक्तंसप्ततष्टंजातंवारादिकं ३।४९।२४वल्लीयोजिता ४१।५।४१ चालकः ०।५७।२६ शेषतिथिभिर्गुणितः १०।६२ इदंघ
टीस्थाने रहितं जातं ३।३८।५१ वल्लीस्थाने चालकः २।८।२२।३२ शेषतिथिभिर्गुणितः २३।३४ अनेनवल्लीयुक्ताजातावल्ली ४।३८
।५२ अस्याप्राग्वज्ज्ञातंवैशाखकृष्ण१० बुधे घटिका १६ पलानि २१ एताः पूर्वनीततुल्याजाताअस्यांतिथौनक्षत्रयोगानयनं ॥
शेषतिथयः ११ स्वषड्विंशदंशेनरहिताजाताः ११ पुनस्ताएवतिथयः स्वद्वाविंशत्यंशेनयुक्ता ११ जातोनक्षत्रयोगो ॥ अनयोरूर्ध्वसप्तविं
शतिवत्फलंशून्यकोष्ठकः नक्षत्रगुच्छस्यंशून्यकोष्ठकादधस्थंवारादि ०।०।० योगगुच्छशून्यकोष्ठस्थंवारादि ।०।०।० वल्ली०।०।० नक्षत्रा
दिकंवारादिकंवारस्थानंशेषनक्षत्रैर्युतं ॥ ११।०।० इदंवर्षादिस्य कोष्ठस्थनक्षत्रवारादिभिः ०।१६।४८ युतंसप्ततष्टंवारादिकं ५।१६।४८
वल्लीयुवल्लीयुक्ता४२।०।२० जातावल्ली ४२।०।३० एवमकृजातयोगवारादिकं १।७।४७ वल्ली४१।५६।६नक्षत्रचालकः ४४।४८शेषनक्षत्रैर्गुणि
तः ८।१३इदंघटीस्थानेयुतंजातंनक्षत्रवारादिकं ४।२५।१ वल्लीचालकः २।१२।१६।३३ शेषनक्षत्रैर्गुणितः २४।१५।२।३ अनेनवल्लीयुता जाता
वल्ली ६।१६।३० पूर्वनीतनक्षत्रमध्ये वर्षादिस्थनक्षत्रं२३ युतंजातं २४ शततारकानक्षत्रं ॥ एवंप्राग्वज्ज्ञातं ॥ वैशाखकृष्णैकादश्यां गुरौ शत
तारकानक्षत्रस्य घटिकाः २ पलानि ११ अथ योगवारादिस्य चालकः ॥ ३।२५।५६ शेषैर्गुणितः ३७।४३।३६ इदं घटीस्थाने रहितं जा

युक्तः घटीपलमध्ये१९।४७ घट्यादिश्चालनांको ३।२५।४६ रहितः जातं द्वितीयकोष्ठकस्थं योगादिकं १५।१।१४।२१।१५
एवं प्रथमपक्षस्थवल्लीमध्ये चालनांको २।३।१३।१८ योजितः जाताद्वितीयकोष्ठस्यावल्ली१४।२।११।८ एवमग्रेपि ॥
प्रथमकोष्टस्यावल्ली ४१।५६।६ योगसौरभस्यैक चत्वारिंशत्कोष्ठकादधस्थ चतुः पञ्चाशत् घटिकाया घट्यांकः १।४२ अध-
स्यांकः १।३७ अंतरंकृणेन अनेनवल्लीस्थ घटीपलानि ५।६ गुणितानि षट् भक्ते लब्धपलानि ४।१५ एतानि पूर्व घटिकामध्ये १।
४२। रहितानि १।३८ जातानि घटी पलानि एतानि पूर्वस्थापित घटीपलमध्ये युतानि जातानि चैत्रशुद्ध१५ शनौ व्याघात योगघ-
टी १९ पलानि २५ एवमग्रेपि तथाकृते जातः प्रथमपक्षः ॥ अथेष्टतिथ्यादिसाधनं॥ वर्षमध्ये यस्मिन्मासे यातिथिरपेक्ष्यते तत्ति-
थिपर्यंतं चैत्रादिप्रतिपदमारभ्य तिथयः स्थाप्याः ॥ ताः वर्षादि तिथ्याहीनाः कार्याः शेषाः सौर वर्षादेरिष्टदिनपर्यंतं तिथयो भव-
न्ति॥ अभीष्टनक्षत्रयोगसाधने तास्तिथयो द्विधाः एकत्र षट्त्रिंशदंशेन हीनाः ॥ अपरत्र द्वाविंशांशेन युताः कार्याः ॥ निरवयवेनो तयत्र-
तापि वर्षादितो नक्षत्रयोगा भवंति ॥ तिथयः पंचदशभक्ताः कार्याः ॥ नक्षत्रयोगो सप्तविंशति भक्ताः फलं निरवयवं ग्राह्यं तेतिथि नक्षत्र योग
कोष्ठाः स्युः एतत्कोष्ठकादधस्थ स्वस्वगुच्छस्थ वारादिकं स्थाप्यं॥ वल्लीचस्थाप्या॥ वारादिक मध्य वर्षादिस्थदेशांतर संस्कृतं वारादिकं योज्यं वल्ली
पुवल्लीयोज्या॥ तदनंतरं वारस्थाने पंचदश भागावशेषास्तिथियोगयुक्ताः कार्याः वारस्थाने सप्तविंशतष्टं कार्यं एवं नक्षत्रयोगौ वर्षादिस्थनक्षत्र
योगाभ्यां सहितौ कार्यौ ॥ सप्तविंशत्यधिके सप्तविंशति तष्टं कार्यं अभीष्ट नक्षत्रयोगौ भवतः ॥ अभीष्टतिथिस्तु ज्ञायते एवेति न तदानयने
यत्नो विधेयः ॥ वारादिकमध्ये स्वस्ववर्षादिस्थदेशान्तर संस्कृतं वारादिकं योज्यं वल्लीपुवल्लीयोज्या॥ वारस्थाने शेषा नक्षत्रयोगा युताः का-

॥अत्रोदाहरणं॥शके१५३४वैशाखशुद्ध१५ग्रहसाधनंक्रियते॥ इष्टशकः १५२४ मध्येपुस्तकीयशके १५१४ शोधितेशेषं२० शेषादधस्थांकः ०।२।२।४ वारः २ शकादधस्थांक. ७।५६।८।५२ वार ५ अनयोर्योग ७।५८।१०।५ वारयोर्योग ७ सप्ततष्टः शनिवारेजातावल्ली ७।५८।१० ।५६ एतन्मध्येवैशाखशुद्धपौर्णमासीस्यपक्षवल्ली ।०।०।०।४४ युताजातावैशाखशुद्ध१५ अर्धरात्रसमयेग्रहवल्ली ७।५८।११।४१ वारेषु ० वार्गे२ युक्तः २जातः सोमवारः ॥इयंग्रहवल्लीरव्यादिसर्वग्रहसाधनेउपयुक्ता ॥ अत्रेदमवधेयं ॥ प्रथमतश्चैत्रादिनिकटग्रह दिन वल्लीतोव- क्ष्यमाणरीत्यासूर्यःसाध्य- सयदिअपेक्षितार्कसमस्तदाशुद्धाअन्यथाअशुद्धा ॥ यदिचार्कः एकराशिन्यूनाधिकःतदावल्लीतलांके स्वरामा- योज्याः शोध्याः परेपिक्रमाद्दयंदेयहेयंवा ॥उदाहरण॥ इष्टशकः १५५८ उक्तवज्जातावल्ली ८।०।३६।३७ वारश्च ५ वल्लीस्थसूर्य. १०।२६ ।४५।२२॥ अपेक्षितमीनार्कोदून इतिवल्लीचतुर्थांकेस्वरामायोजिताजातावल्ली ८।०।३७।७ इयंयोजनाद्वारेश्च एतद्वल्लीस्थसूर्यः ११।१९।२६ ।२७ अपेक्षितार्कसमइति१५५८ अस्मिन्चैत्रादितःभागमांयांवल्लीशनौजाताशुद्धाएवमधिकल्पेद्रष्टव्यं ॥ अतएवोक्तं दिवाकरेण ॥ अपे- क्षितार्कादिति। अथग्रहसाधनं ॥ स्वस्वचादिकायांवल्यांयश्चतुर्थांकः तत्प्रमितकोष्ठकस्थाश्चत्वारोंकाःस्थाप्याः ॥ तदनंतरंवल्लीतृतीयांक तुल्यकोष्ठकस्थप्रथमांकंविहायचत्वारोंकाःस्थाप्याः ॥ ततोवल्लीद्वितीयांकतुल्यकोष्ठस्थोर्ध्वांकद्वयं विहायचत्वारोंकाःस्थाप्याः ॥ततोव ल्लीप्रथमांकतुल्यकोष्ठस्थोर्ध्वांकत्रयंविहायचत्वारोंकास्थाप्याः ॥ ऊर्ध्वांकास्त्याज्याः ॥ततस्तेषांयोगःकार्यः ऊर्ध्वांकपष्ट्यधिकःपष्टितष्ट- कार्यः साग्रहवल्ली षट्यादिर्भवति ॥ रविचंद्रादिवल्लीभिन्नालेख्याः ॥ अग्रेउपयुक्तत्वात् ॥ तदनंतरंग्रहवल्लीषट्गुण्याअंशादिकंस्यात् ॥ अंशादिकंस्पष्टकाराशयोभवंति ॥ एवमर्धरात्रसमयेराश्यादिग्रहाभवंति ॥ चंद्रोच्चबुधभृगुवल्लीनांविशेषः ॥ उक्तवच्चंद्रोच्चवल्लीकार्या ॥तस्याऊ र्ध्वांकेपंचत्वारिंशद्युक्ताकार्यातदनंतरंचंद्रवल्लीमध्येशोध्यातदनंतरं षड्गुणिताकार्याचंद्रोच्चंभवति ॥यदावल्लीमध्येवल्लीनशुध्यतितदोर्ध्वां

परिघ्रुताकार्या ॥ बुधशुक्रोच्चवल्लीमध्येशोध्यातदनंतरंषड्गुणिताकार्याबुधशुक्रयोः शीघ्रोच्चंभवति ॥ एवंग्रहसाधनांते रेखास्वदेशां-
तरयोजनरीत्यादिनादेशांतरसंस्कारः कार्यः ॥ अर्धरात्रेचरा भावाच्चरसंस्कारोनभवति ॥ उदाहरणं ॥ शके १५३४ वैशाख शुद्ध १५ व-
ल्ली ७।५८।११।४० रविवारिकायांचत्वारिंशत्कोष्ठकादधस्थांकः ६।३५।१२।४७ एकादशकोष्ठकादधस्थांकाद्यंकविहारोचत्वारो येकः
४८।२४।५८।२९ अष्टपंचाशत्कोष्ठकादधस्थांक ३८।५८।२०।३४ सप्तमकोष्ठकादधस्थांकः १।५२।८।१४ चतुर्णांयोगे जातारविवल्ली १२
।५।४१।४१।५४ ऊर्ध्वांकेषष्टिलब्धशेषं ५।४१।४१।५४ इदंषड्गुणंजाताः अंशाः ३४।५८।११।२४ अंशास्त्रिंशद्भक्ताः लब्धंराशयः एवं
राश्याद्योरविः १।४।५८।११ चंद्रवल्ली ३५।२।१२।१२ चंद्रः ७।०।१३।१२ चंद्रोच्चवल्ली ९७।४१।६।३७ ऊर्ध्वांकेशरवेद ४५ युक्ताजाता४२
।४१।६।३७ इदंचंद्रवल्लीमध्ये ३५।२।१२।१२ रहितंजातं ५२।२१।५।२४ उच्चः १०।१४।३३ भौमवल्ली ४०।५२।३६।१८ भौम १।२१।२१।३८
बुधोच्चवल्ली ५१।२४।३३।५४ रविवल्ली ५।४१।४१।५४ मध्येशुद्धाजातंबुधशीघ्रोच्चं २।२५।३०।४८ गुरुवल्ली २१।४३।३१।५८ गुरुः ४।
१०।२१।१२ शुक्रोच्चवल्ली ४३।११।३०।१८ रविवल्लीमध्येशोधिताजातंशुक्रशीघ्रोच्चं ८।१५।११।१ शनिवल्ली ५४।१७।४१।२ शनिः १०।२५।४६
।६ केतुवल्ली ३७।३०।४४।४१ केतुः ७।१५।४।२९ अथराशीषट्कयुक्तोजातोराहुः १।१५।४।२८ अथवाकेतुवल्यामूर्ध्वांकेत्रिंश ३० युक्ता
राहुवल्ली भवति काश्यांदेशांतर योजनानि ६४ ऋणानिरेखास्वदेशांतरयोजनघ्नोगतिर्ग्रहस्याभ्रगजैर्विभक्ताः ॥ लब्धाविलिप्ताः खच
रो विधेयाः प्राच्यामृणंपश्चिमतोधनंच इत्यादिनादेशांतरकलाः ४७ ऋणंदेशांतरसंस्कृतोरविः १।४।५७।२४ चंद्रः ७।०।२।४० उच्चं १०
।१४।६।३८ भौमः १।२१।२१।१२ बुधोच्चं २।२५।२७।३१ गुरुः ४।१०।२१।८ शुक्रोच्चं ८।१४।५८।५२ शनिः १०।२५।४६।५ राहुः
१।१५।४।३० इष्टशकमध्ये १५३४ नवसप्तेंदुरामाः ३१७९ योजिताजातंकलिगतं ४७१३ कलिगतस्य सहस्रांशो १००० शादि ४।४२

४६ शनिबीजधनं ॥ एतस्यांशे १।२५।१५ सहितं जातं बुधोच्चधनं तस्य धनं ५।१७।१ शनिबीजस्यांशेन रहितं जातं ३।०।३१ ऋणं गुरोः श-
निबीजं शुक्रोच्चऋणं ४।५२।४६ बीजसंस्कृतं बुधोच्चं २।१।४४।३२ गुरुः ५।७।१२।२७ शुक्रोच्चं ४।१०।१७।७ शनिः ११।०।२८।५१ ॥
अथ कश्चिद्विशेष उच्यते ॥ यदा ग्रहदिनवल्ली अङ्कचतुष्टयमध्ये शून्यमायाति तदा ग्रहसाधनं कथं कार्यं ॥ यतो ग्रहसारिकायां शून्यकोष्ठकोना-
स्ति ॥ आदौ शून्यकोष्ठकमस्तीति चेत् तत्र शून्यस्थाने पारिवर्तते ॥ इतिकारणात् शून्यकोष्ठकस्याभावात् शून्यस्थाने फलाभावः ॥ तत्र अं-
कत्रययोगे ग्रहवल्ली भवति ॥ सारिकायामंकसारिकायामंकग्रहणे शून्यस्थाने एकैकअंकं विहाय योज्यमित्यनुवर्तते ॥ यदा शून्यस्थाने प
ष्टिः स्थाप्यते तदा शून्यकोष्ठकादधस्थांको ग्राह्यः ॥ एवमंकचतुष्टययोगी ग्रहवल्ली भवति ॥ एवं प्रकारद्वयेन तुल्यैव भवति वल्ली ॥ कल्पितावल्ली
७।५८।०।४० रविसारिकायां चत्वारिंशत्कोष्ठकादधस्थांकः ६।३४।१४।२७ अष्टपञ्चाशत्कोष्ठकादधस्थांकः २८।५८।०।३४ सप्तमको-
ष्ठकादधस्थांकः ३१।५२।८।१४ एषां योगे जाता वल्ली १७।२४।४३।१५ अथवा ग्रहदिनवल्ली ७।५७।६०।४० चत्वारिंशत्कोष्ठकादधस्थां-
कः ६।३४।१४।२७ शून्यकोष्ठकादधस्थांकः ५१।२१।४१।४४ सप्तपंचाशत्कोष्ठकादधःस्थांकः ३१।५२।८।१४ एषां योगे जाता वल्ली १७
२४।४३।१५ अथवा ग्रहदिनवल्ली ७।५०।६०।४० चत्वारिंशत्कोष्ठादधस्थांकः ६।३४।१४।२७ शून्यकोष्ठकादधस्थांकः ५१।२१।४१
।४४ सप्तपंचाशत्कोष्ठकादधस्थांकः ४७।३६।२८।४९ सप्तमकोष्ठकादधस्थांकः ३१।५२।८।१४ एषां योगे जाता सैव रविवल्ली १७।२४।४३।१५
एवं सर्वग्रहेषु शून्यस्थाने शून्यकोष्ठस्य फलं चेन्मुच्यते तदा इयं वल्ली संपद्यते ८।४६।२४।५१ तस्मादियमशुद्धा ॥ एतदुत्पन्नरवेर्विसंवादात् ॥
यदा वल्यामंकत्रये शून्यं ॥ तदा ऊर्ध्वांकप्रमितकोष्ठकस्य अधस्थांकमध्ये अंकत्रयं त्यक्त्वा चत्वारोंका ग्राह्याः सैव ग्रहवल्ली ॥ अथ रवीन्द्वोः
स्पष्टीकरणं ॥ मंदोच्चं रविमध्यशोध्यं मंदकेन्द्रं भवति तस्य भुजांशाद्याः कार्याः ॥ भुजांशतुल्यकोष्ठकादधस्य भागादिफलं ग्राह्यं ॥ तदग्रिम

कोष्टकस्थफलेनसद्वांतरंकार्यं ॥ तेनांतरेणभुजांशाद्धस्थंकलाद्यंगुण्यंषष्ट्याभक्तंफलंकलाद्यंग्राह्यंएताःकलाःपूर्वस्थापितफलमध्ये युक्ताःकार्याः॥ अग्रिमकोष्ठकस्याधिकत्वात् ॥ अंशाद्यमंदफलंभवति ॥ मेषादिषट्केन्द्रेऋणं ॥ तुलादिषट्केधनं अनेनसंस्कृतोरविः स्पष्टोभवति ॥ अथगतिसाधनं ॥ फलादधःस्थंकलाद्यंगतिफलंग्राह्यंतदग्रिमांतरेणभुजांशाधःस्थंकलाद्यंगुण्यंषष्ट्याभाज्यंफलं कलाद्यंग्राह्यंएताःकलाःपूर्वस्थापितगतिकलामध्येसहितारहिताःकार्याःअग्रिमकोष्ठकवशात् ॥ इदंस्वकीयमध्यगतौकर्कादिकेन्द्रे धनं ॥ मकरादौऋणं ॥ सास्पष्टागतिः ॥ अनयारीत्याचंद्रस्यस्पष्टीकरणं ॥ अथोदाहरणं ॥ रवेर्मंदोच्च २।१७।१७।० रविमध्ये जातरविमंदकेंद्रं १०।२७।४०।२४ अस्यभुजांशाः ४२।११।२४ द्विचत्वारिंशत्कोष्ठकादधस्थंफलं १।२८।२ अग्रिमकोष्ठकस्थंफलं ॥१।२९।४६ अन्तरं १।४३ अनेनकलाद्यं ११।३६ गुणितं ३३।३८षष्टिभक्तंफलंकलाद्यं ०।३३।३८ इदंपूर्वस्थापितफलमध्ये १। २८।२ सहितंजातंरवेमंदफलं १।२८।३६ तुलादिकेंद्रत्वाद्धनंअनेनसंस्कृतोजातः स्पष्टसूर्यः ॥ ३।६।२६।० कलादधःस्थंगतिफलं १।३८। अग्रिमांतरेणविकलात्मकेन कलाद्यं ११।३६ गुणितं ३१।१२ षष्टिभक्तं अग्रिमांकस्यन्यूनत्वात्गतिफलमध्ये १।३८ रहितं जातंगतिफलं १।३७ मकरादिकेन्द्रत्वात्ऋणंअनेनमध्यमागतिः ५९।८ संस्कृताजातास्पष्टागतिः ५७।३१ अथचंद्रस्पष्टीकरणं ॥ चंद्रोच्चंचंद्रमध्येशोधितंउच्चं १४।६।२८ चंद्रः ७।०।२।४० जातंचंद्रस्यमंदकेंद्रं ८।१५।५६।१२उक्तवन्मंदफलंधनं ४।५३।५३ अनेनसंस्कृतोजातः स्पष्टचन्द्रः ७।४।५६।३३ गतिफलं १६।५७ धनंअनेनसंस्कृतामध्यागतिः ७।९०।३५ जातास्पष्टाचंद्रस्यग- तिः ८०७।३२ ॥ अथभौमादीनांस्पष्टीकरणं ॥ तत्रगुरुभौमशनीनांशीघ्रोच्चमध्यमोरविः ॥ बुधशुक्रयोःपूर्वसाधितमस्ति ॥ योमध्यमो रविःसएवबुधशुक्रौ ॥ ग्रहमध्येहीनंशीघ्रोच्चंकार्यंशीघ्रकेंद्रंभवति ॥ यद्भाधिकंद्वादशराशिभ्यःशोध्यंषड्भान्न्यूनंयथास्थितमेव ॥

तस्यांशाः कार्याः त्र्यंशप्रमित कोष्ठकादधस्थशीघ्रफलं भागाद्यंस्थाप्यं ॥ अग्रिमांतरेण कलाद्यंगुण्यं षष्टि भक्तं फलं कलाद्यं ग्राह्यं ॥
तत्फलं पूर्वस्थापितफलमध्येरहितंसहितंकार्यं॥ अग्रिमकोष्ठवशात् ॥तदंशाद्यंशीघ्रफलं भवति ॥ मेषादौऋणं ॥ तुलादौधनं ॥ अस्या
र्द्धेनमध्यमः संस्कृतः कार्यः ॥ शीघ्रफलार्द्धसंस्कृतोभवति ॥ तदनंतरमेतन्मध्ये मन्दोच्चं शोध्यं मंदकेन्द्रं भवति ॥ षड्भाधिकंद्वादशराशि
भ्यः शोध्यंतस्यांशाः कार्याः तत्प्रमितकोष्ठकादधस्थंभशाद्यं मंदफलंग्राह्यं ॥ अग्रिमांतरेण कलाद्यंगुण्यं ॥ षष्टिभक्तंकलाद्यं ॥ तत्पूर्वस्था
पितफलमध्येरहितसहितंकार्यमग्रिमकोष्ठवशात् ॥तन्मंदफलं भवतिइदंयथागतंधनर्णंसंपूर्णमध्यग्रहेदेयंसमंदः स्पष्टोभवति ॥ इ-
दंमंदफलंपूर्वंशीघ्रफलमध्येधनंचेद्धनं ॥ ऋणंचेदृणंदेयं ॥ द्वितीयशीघ्रफलसाधनेशीघ्रकेंद्रं भवति ॥ अथवाशीघ्रोच्चंमंदस्पष्ट
मध्येशोध्यंशीघ्रकेन्द्रंभवति ॥ अस्मात्पूर्ववत्शीघ्रफलंकार्यं ॥ तन्मंदस्पष्टग्रहेदेयंस्पष्टग्रहोभवति॥ अथगतिसाधनं ॥ मंदफलसाध
नेयन्मंदांकांतरंतेनस्वीयागतिर्गुणयेत् ॥ फलंकलाद्यंतत्स्वगतौमकरादिमन्दकेन्द्रेऋणंकर्कादौधनंकार्यं॥ सामंदस्पष्टागतिर्भवेत् ॥ अनेनो
नाशीघ्रोच्चगतिः ॥ शीघ्रगतिर्भवतिअंतिमशीघ्रफलसाधनाच्छीघ्रांकांतरंतेनांतरेणशीघ्रगतिर्गुण्याषष्ट्याभाज्याफलंअग्रिमकोष्ठ
कवशान्मंदस्पष्टगतौधनर्णंकार्यंसास्पष्टागतिर्भवेत् ॥ विपरीतशोधनेनवक्रागतिः ॥ ॥ उदाहरणं ॥ भौममध्ये ९।२१।२१।१२ एतस्य
शीघ्रोच्चरविः ११४।५७।२४ शोधितः जातंशीघ्रकेंद्रं ॥८।२६।२३।४९ षड्भाधिकं अतश्चक्रात् शोधितं ३।५।३६।११ अस्यां
शाः ९५।३६।११ शीघ्रफलंधनं ३४।२२।३८ अस्यार्धेन १७।११।१९ संस्कृतो भौमः ॥१०।६।३२।२२ एतन्मध्येये मंदोच्चं ४।१०
शोधितंजातंमंदकेन्द्रं ६।६।३२।३३ मंदफलंधनं १।२९।३६ मध्यमभौमेदत्तंजातोमंदस्पष्टोभौमः ॥१०।०।५०।४९ तन्मंदफलं
प्रथमंशीघ्रकेंद्रस्यधनंदत्तंजातंद्वितीयशीघ्रकेंद्रं ८।२५।५।२५ अस्मात् प्राग्वत्शीघ्रफलंधनं ३३।५८।४६ शीघ्रफलसंस्कृतो मंदफ

ल्स्पष्टोजातः स्पष्टोभौमः ॥११।४।४१।३४ मंदांकांतरेण २४ गतिर्गुणिता ४४०।४ षष्टिभक्ताफलंकर्कादिकेन्द्रत्वात् धनं ॥ ७।२०
ग्रनेनसंस्कृतामध्यगतिः। ३१।२६ जातामंदस्पष्टागतिः ३८।४६ अनेनोनाशीघ्रोच्चगतिः ५९।८ जाताशीघ्रकेन्द्रगतिः २०।२२ इयंशी
घ्रांकान्तरेण ६ गुणिता १२५।५२ षष्टिभक्ताफलं ५।२५ अनेनसंस्कृतामंदस्पष्टागतिर्जातास्पष्टागतिः ॥ ४४।११ इतिभौमस्पष्टीकरणं
॥ अथबुधस्पष्टीकरणं ॥ शीघ्रकेन्द्रे १०।३।१२।५२ शीघ्रफलार्धं ७।१०।६ संस्कृतोबुधः ११।२।७।३० मंदोच्चं ७।१० रहितंमंदकेन्द्रं ५।२।७।३ मं
दफलंधनं ०।१०।२६ मध्यग्रहेदत्तंमंदस्पष्टं ॥ ११५।८।० तन्मंदफलंप्रथमशीघ्रकेन्द्रेदत्तंजातंद्वितीयशीघ्रकेंद्रं १०।३।२३।८ अस्मात्पुनः
शीघ्रफलंधनं १४।१७।५५ मंदस्पष्टेदत्तंजातस्पष्टोबुधः ११।११।२५।५५ मंदांकांतरेणगतिगुणितः २९१।५।४० षष्टिभक्ताफलं ४।५५ मक
रादिकेन्द्रत्वादृणंमंदस्पष्टागतिः ५४।१३ अनेनोनाशीघ्रोच्चगतिर्जाताशीघ्रकेन्द्रगतिः १९१।११ इयंशीघ्रांकांतरेण १२ गुणिता १७।१८।२२
षष्टिभक्ताः फलं २८।५८ अनेनसंस्कृताजातास्पष्टागतिः १०३।१३ इतिबुधस्पष्टीकरणं ॥ अथगुरुस्पष्टीकरणं ॥ गुरुमध्ये ४।७।१२
।३७ सूर्यः ११।४।५७।२४ शोधितःशीघ्रकेंद्रः ३।२।१५।१३ फलार्धंऋणं ४।४१।२२ संस्कृतोगुरुः ४।१।१३।१५ मंदोच्चेन ५।२० हीनमं
दकेन्द्रं १०।११।३१।१५ मंदफलंधनं ३।४३।२६ मंदस्पष्टोगुरुः ४।१०।५६।३ मंदफलंप्रथमशीघ्रकेन्द्रेदत्तंजातंद्वितीयंशीघ्रकेंद्रं ३।५।५८
३० तत्शीघ्रफलंऋणं ११।२८।२८ स्पष्टोगुरुः मंदांकांतरे ३ गतिः ५ निघ्ना १५ षष्टिभक्ताफलं ०।१५ फलंमकरादित्वादृणं ४।४५ जातामंदस्पष्टा
गतिः ॥ अनयोनाशीघ्रोच्चगतिः ५८ जाताशीघ्रकेंद्रगतिः ५४।२३ इयंशीघ्रांकांतरेणगुणिता ५४।२३ षष्टिभक्ताफलंमंदस्पष्टगतौधनंजाता
स्पष्टागतिः ५।३९ इतिगुरुस्पष्टीकरणं ॥ अथशुक्रस्पष्टीकरणं ॥ शुक्रशीघ्रकेंद्रं ८।२४।४०।१७ फलार्धंऋणं १८।५०।७ संस्कृतःशुक्रः १
।२३।४७।३१ मंदोच्चं २।२० मंदकेन्द्रं ११।३।२७।३१ मंदफलंधनं ०।४१।२५ मंदःस्पष्टःशुक्रः १।५।४६।४१ शीघ्रकेंद्रं ८।२५।२१।४२ शीघ्रफलं

धनं ३७।२४।६स्पष्टःशुक्रः २।१३।१०।५५ मंदांकांतरं २ मंदस्पष्टगतिः ॥ शीघ्रकेंद्रगतिः ३८।२८शीघ्रांकांतरं २० शीघ्रगतिफलं धनं १२।
५९स्पष्टगतिः ७०।१ इतिशुक्रः ॥अथशनिस्पष्टीकरणं ॥शीघ्रकेंद्रं१।२५।३१।२७शीघ्रफलार्द्धधनं२।४३।२७ संस्कृतःशनिः ११
।३।१२।२८ मंदोच्चं ७।२६ मंदकेंद्रं ३७।१२।१८ मंदफलंऋणं७।३८।४६ मंदःस्पष्टः १०।२२।५० शीघ्रकेंद्रं ९।१७।५२।२९शीघ्रफलंध-
नं५।४८ २२ स्पष्टःशनिः १०।२८।३८।२५ मंदांकांतरं १ मंदस्पष्टगतिः २।२शीघ्रकेंद्रगतिः५७।६ शीघ्रांकांतरंधनं २।५१स्पष्टगतिः ४
।५३ अथसौरभोपरिकिंचितस्थूलं रव्यादिग्रहाणांस्पष्टीकरणं तत्रादौअभीष्टदिवसेउक्तवत्ग्रहलाघवात्तदुपरिस्वस्ववाटिकायांघ-
टिकादिर्ग्रहःकार्यः ॥ तस्यकंदइतिसंज्ञाकार्या तदनंतरंदेशांतरसंस्कारः कार्यः ॥ सयथा ॥ यस्यग्रहस्यकलात्मकंदेशांतरंतत्पद्भक्तंफ-
लात्मकेनफलेनघटिकादिग्रहस्यपलस्थानेधनंचेत्साहितंऋणंचेत्तदारहितंकार्यं ॥यस्यविकलात्मकंदेशांतरंतत् षड् भक्तंविपलात्मकेनविपलस्था-
नेसहितरहितंकार्यं ॥ तदनंतरमब्दवीजसंस्कारःकार्यः ॥तद्यथा ॥ अंशादिवीजंपट्गुणितंयोज्यं ॥तेनघटिकादिग्रहःसंस्कार्यः ॥ इतिआदौकृत्वा-
तत्स्पष्टीकरणं ॥तत्रादौसूर्यस्यसूर्यकंदस्यघटितुल्यंरविसौरभस्थंकोष्टकादधस्थंघटिकादिफलंग्राह्यं ॥ अग्रिमांतरेणशेषंगुणनीयं ॥ ष-
ष्टिभाज्यं ॥ पलात्मकेनपूर्वस्थापितघटिकादिफलस्थानेयुतंकार्यं ॥ अग्रिमस्याधिकत्वात् ॥ एवंकृतेघट्यादिस्पष्टोरविर्भवति ॥तदनंतरंषड्गुणः
कार्यः ॥ अंशादिर्भवति ॥ अंशास्त्रिंशद्भक्ताराशयोभवंति ॥उदाहरणं ॥पूर्वानीतरविकंदः ।५।४१।४१।५४ देशांतरंऋणं ७।५० संस्कृतः
५।४१।३४।४ पंचकोष्टकादधस्थं घटिकादिफलं ५।१६।१२ अग्रिमांतरेण ५८।३७ शेषं ४१।३४।४ गुणितं २८८८ षष्टि भक्तंफलं ४८।८
अनेनघटिकार्यं ६।४।२० युतंषड्गुणितंजातोराश्यादिस्पष्टोर्कः ११।६।२६।२० अथगतिसाधनं ॥गतगम्यकोष्टांतरएकेनांतरितंकार्यं ॥ त-
त्रफलाःकार्याः गतगम्यांतरापेक्षयारूपाधिकत्वेमध्यगतौरहिता ॥ न्यूनेयुताःकार्यारवेः स्पष्टागतिर्भवति ॥ उदाहरणं ॥ गतगम्यांतरं ॥०॥

५८।१७ एकेनांतरितं ०।१।४३ कली ४ क्रांतगतगम्यांतरापेक्षयारूपाधिकत्वात् ॥ अनेनहीनारविमध्यगतिः ५७।२५ अथचंद्रस्पष्टीकरणं
॥ऊर्ध्वांकेपंचचत्वारिंशद्युताजाताचंद्रोच्चवल्लीतस्यलताइतिसंज्ञाकार्यातिल्लतोपरिचंद्रसौरभोपरिचंद्रसौरभस्थसानुपात घटिका
दिफलंग्राह्यं ॥ तच्चंद्रकंदेपुयोज्यं ॥ तदनंतरंषड्गुणितंकार्यं ॥ स्पष्टचन्द्रोभवति ॥ सर्वत्रानुपातेषष्टिर्भाजकः ॥उदाहरणं ॥लता
४१।६।३७ देशांतरं ०।५० संस्कृतालता ४२।४१।५।४७ चन्द्रसौरभस्थंद्विचत्वारिंशत्कोष्ठकादधस्थंसानुपातंघटिकादिफलं ०।४८।५
।२८ चंद्रकेंद्रः ३५।२।१२।७ देशांतरं १।४१।२० संस्कृतं ३१।१०।२६।४७ फलेनयुक्तः ३५।२२।१५ षड्गुणितःस्पष्टचंद्रः ७।४।५६।११
अथगतिः ॥द्विचत्वारिंशत्कोष्ठकादधःस्थंसानुपातघटिकादिचन्द्रगतेः फलं २।१४।२५ षड्गुणजाताः अंशाः १३।२७। ३० षष्ट्यागुणि-
तास्पष्टाचन्द्रगतिः कलाद्या ८०७३० ॥ अथभौमस्पष्टीकरणं ॥ भौमकंदमध्येरविकंदःशोध्यः ॥यच्छेषंतस्यलतासंज्ञाकार्या॥ल
तायाघटीप्रमितकोष्ठकादधःस्थंभौमसौरभस्थंसानुपातंघटिकाफलंग्राह्यं ॥तत्फलंभौमकंदेपुयोज्यं॥तदुपकंदसंज्ञकंभवति ॥उप-
कंदोपरिउपकंदस्थंसानुपातंघटिकादिफलंग्राह्यं ॥ तत्फलंभौमकंदमध्येयोज्यंसुकंदोभवति ॥लतामध्येयोज्यंसुलताभवति ॥सुलतो
परिसुलताफलंसानुपातघट्यादिफलंग्राह्यं ॥तत्फलंसुकंदेपुयोज्यंतदनंतरंघटीस्थानेदशभीरहितंकार्यं ॥तन्मकरंदसंज्ञकंभवति ॥तदनंत-
रंषड्गुणितंभवतिभौमःस्पष्टोभवति ॥ अनयारीत्यागुरुशन्योःस्पष्टीकरणं ॥बुधशुक्रयोःसाधितांकचतुष्टययोगेघटिकादिकेंद्रवल्लीसैवल
ताज्ञेया ॥रविकन्दएवबुधशुक्रयोःकन्दौ॥ अनयोःस्पष्टीकरणं ॥रविकन्दः ५।५१।३४।४ भौमकन्दः ४१।५३।२६।१८ दिशान्तरं ४।१० संस्कृतः ४१
।५३।३२।८ एतन्मध्येरविकन्दःशोधिताजातालता ४४।३।५८।४ लतोपरिप्राप्तसौरभस्थंघटिकादिफलं ॥४१।१२।७ अग्रिमांतरे ०।२८ अनुपातफ
लं ०।३३।२५ अनेनपूर्वफलंसंस्कृतं ॥४१।११।३३।२५ इदंभौमकन्दमध्येयुतंजातोपकन्दः ३१।५।५।३३ एतदुपरिप्राप्तंउपकन्दफलंसानुपातं २।१८।५०।

अनेनयुक्तोभौमकन्दः जातःसुकंदः ५२।८।२२।१७ पुनःफलेनयुताजातासुलता ॥४६।१८।४८।३३ सुलतोपरिभामंसुवल्लीफलं १२।३१
४१।५५ अनेनसुकन्दोयुक्तः ६५।४८।४।१२ दशभिर्हीनोजातोमकरंदः ५५।४८।४।१२ षड्गुणितःजातोराश्यादिः स्पष्टोभौमः ११
।४।४८।२५ अथगतिसाधनं ॥ भौमस्योपकन्दफलयोर्गतगम्ययोरंतरेणगतिर्गुणनीया ॥ तन्मंदफलंभवति ॥ इदंमध्यगतौगम्यस्याधिक
त्वेयुतंन्यूनत्वेऋणं ॥ सामन्दस्पष्टागतिर्भवति ॥ अनयोनाशीघ्रं ।केन्द्रगतिशीघ्रोच्चगतिर्भवति ॥ इयंसुवल्लीफलांतरेणगुण्यागतेःशीघ्रफ
लंभवति ॥ तेनफलेनगतैष्यांकस्याधिकत्वेमन्दस्पष्टागतिर्भवति ॥ अनयारीत्याबुधशुक्रशनीनांगतिसाधनङ्कार्यं ॥ उदाहरणं ॥ उपकंदफलयोरं
तरं ०।१२।२३ गतिः ३१।२५ गुणिताजातंमंदफलंएष्यांकस्याधिकत्वाद्धनं ७।०।४१ अनेनयुतामध्यगतिः जातामंदस्पष्टा ॥ ३८।२७ अनेन
रहिताशीघ्रोच्चगतिः ३१।८ जाताशीघ्रकेन्द्रगतिः २०।४१ इयंसुवल्लीफलांतरेण ०।१६।५५ गुणिताजातंशीघ्रगतेःफलंएष्यांकस्यहीन
त्वादृणं ५।४१।५३ अनेनयुतामंदस्पष्टागतिःजातास्पष्टा ४४।१७ अथबुधस्पष्टीकरणं ॥ लता ५१।३४।२३।५४ शीघ्रकेंद्रगतिप्रमाणेन
देशांतर २४।५० संस्कृता ५१।३१।८।३० अनेनबुधकंदः ५।४१।३४ युतोजातः उपकंदः ३०।२०।४२।३४ अस्मादुपकंदफलं २११।४६।३१
अनेनसुकंदोयुक्तःजातःसुकंदः ७।५१।२०।४२ सुलतायुताजातासुलता ५२।२३।५।२३ सुवल्लीफलं ३०।२३।६।२८ अनेनसुकंदोयुक्तः
१८।१४।२७।११ दशभिर्हीनोजातोमकरंदः ८।४४।२७।११ षड्गुणितोजातोराश्यादिः स्पष्टोबुधः १।१९।२६।४३ उपकंदफलयोरंतरं ०।५।१
धनंमंदस्पष्टागतिः ६४।१२ शीघ्रकेंद्रगतिः १८।१।२१ । सुवल्लीफलयोरंतरंऋणं ०।१२।४७ स्पष्टागतिः १०२।५० ॥ अथगुरुस्पष्टीकरणं ॥
विकंदः ५।४१।३४।४ गुरुकंदः २१।४३।३१।५८ देशांतरं ०।४० संस्कृतः २।४३।३१।१८ बीजंऋणं ०।३१।२५।१० संस्कृतः २१।१२।६
।८ एतन्मध्येरविकंदःशोधितःजातालता १५।२२।२२।४ सौरभोपरिफलं ३०।११।४४।५१ अनेनगुरुकंदोयुक्तःजातउपकंदः ५१।४१।५०।५१

उपकंदफलं २।२८।१।४८ अनेनकंदोयुक्तोजातः सुकंदः २३।५०।७।२७ सुलता १८।०।३३।५३ सुवल्लीफलं ६।५।१६।४४ अनेनसुकं
दोयुक्तः २१।५५।२४ दशहीनोजातोमकरंदः ११।५५।२४।४१ षड्गुणितोगत्यादिस्पष्टोगुरुः ३।२९।३२।२८ उपकंदफलयोरंतरं ऋणं ०।३।२२
मंदस्पष्टागतिः ४।४४ शीघ्रकेंद्रगतिः ५४।२४ सुवल्लीफलयोरंतरंऋणं ०।२०।२१ स्पष्टागतिः ५।१० ॥ ॥ अथभृगुस्पष्टीकरणं शुक्रलता ४३।१९
।३०।११ देशांतरं ०।५० संस्कृता ४३।१९।२५।११ बीजंधनं ०।४७।७।५० संस्कृतालता ४४।६।३३।१ सौरमस्यंफलं ४९।३९।३३।८ अनेन
शुक्रकन्दोभवति ५।४१।२४।४ युक्तोजातउपकन्दः ५५।२१।७।१२ उपकंदफलं २।८।१४।२७ सुकंदः ७।५७।४८।३१ सुलता ४६।१४।५७।३१ सुवल्लीफलं
१४।१३।२७।५१ अनेनसुकंदोयुक्तः ६४।४६।२८।० मकरन्दः ५४।४६।२८।० षड्गुणा स्पष्टः शनिः १०।२८।३८।४८ उपकंदफलयोरन्तरंधनं ०।७।४४
मन्दस्पष्टागतिः ५७।७ सुवल्लीफलयोरन्तरंऋणं ०।०।२० स्पष्टागतिः ४।१४ ॥ अथायनांशसाधनं ॥ इष्टशकः कुयमाब्धिहीनः कार्यः तदनन्तरस्वदश
मांशेनहीनः कार्यः ॥ षष्ट्याभाज्यः ॥ अयनांशाभवन्ति ॥ उदाहरणं ॥ इष्टशकः १५।३५ अनेन ४२१ हीनः ११।१२ अयंद्विष्टः अस्यदशमांशेन
१११।१८ रहितः १००१।१२ षष्टिभक्ताजाताअयनांशाः १६।४१।४२ ॥ अथदिनमानसाधनं ॥ स्पष्टः सूर्यः अयनांशयुक्तः कार्यः तस्यांशाः षड्भि
र्भाज्याः षष्टिकोष्ठकादधः स्वंघटयाफलंस्थाप्यं ॥ तद्दिनमानरूपं ॥ अग्रिमकोष्ठकान्तरेणशेषंगुण्यं ॥ षड्भक्तानिलब्धानिपलानि ॥ एतानिपूर्वस्था
पितदिनमानफलस्थानेअग्रिमकोष्ठकवशात्सहितानिरहितानिवाकार्याणि ॥ तद्दिनमानंभवेत् ॥ उदाहरणं ॥ सूर्यः ३।६।२६।० अयनांशैर्युक्तः ४।२३।
७।४२ अंशाः ५३।७।४२ षष्टिभक्ताफलं ८ एतत्तुल्यकोष्ठकस्थंदिनमानं ३२।४४ अग्रिमान्तरेण १८ शेषं ५।७।४२ गुणितं ९२।१८।३६ षड्भिर्भक्तं लब्धपलानि
१५ एतानि अग्रिमस्याधिकत्वात् पूर्वस्थापितदिनमानपलमध्येयुतोनितं जातंदिनमानं ३३।९ ॥ अथप्रकारांतरेणरवेः प्रतिराशिप्रतिराशिपल्यं
शोपरिदिनमानसाधनं ॥ स्पष्टांकस्थाप्यः ॥ अत्रायनांशसंस्कारोनास्ति ॥ रवेर्यावंतोराशयस्तदधोयावंतोभागाः संति तत्तुल्यराश्यंश सूर्या

दधःस्थंदिनमानंग्राह्यं ॥ अग्रिमांतरेण गुण्यंषष्ट्या भाज्यं ॥ पलात्मकलब्धंपलस्थाने अग्रिमकोष्ठकवशात् रहितसहितंकार्यंतद्दिनमानंस्यात् ॥ उदाहरणं ॥ सूर्यः १।६।२६।० एततुल्यसूर्यादधस्थंदिनमानं ॥ ३३।५ अग्रिमांतरेण ३ शेषं २६।० गुणितं ७८ षष्ट्या भक्तं फलं १ अनेनसंस्कृतंजातंस्पष्टंदिनमानं ३३।६ अथचंद्रदर्शनं ॥ यस्मिन्मासे शुक्लप्रतिपदि चंद्रदर्शनमवलोक्यते तस्मिन् मासि नद्दिनेस्त्र्यर्थोयद्राशावस्तितद्राशिस्थः सूर्यस्तिर्यक्पंक्तौयस्मिन् कोष्ठके भवति सकोष्ठकोग्राह्यः ॥ तदनंतरं यस्मिन्राशौ राहुरस्तितद्राशिस्थोराहुः ऊर्ध्वपंक्तौ यस्मिन् कोष्ठके भवति तत्कोष्ठकादधस्तात् सूर्यकोष्ठकाभिमुखी घटी ग्राह्या ॥ तदनंतरं अमावास्यायाः विद्यमानघटिकास्ताः षष्टिकामध्ये शोध्याः तदनंतरं यच्छेषं भवति तद्दिनजंदिनमानंतन्मध्येयोज्यं ॥ एवंकृतेयाघटिका भवंतिताः पूर्वस्थापितघटिस्यश्चेदधिकास्तदाप्रतिपदि चंद्रोदृश्यः ॥ न्यूने अदृश्यः ॥ किंतु द्वितीयायांदृश्यः ॥ उदाहरणं ॥ सूर्यः ४।२० राहुः १०।२ अत्ररविः सिंहेकुंभेराहुः ॥ अनयोः श्वासघटी ८१ अमावास्यायाः घटिकाः १।४० षष्टिमध्येशोधिताः ५८।२० शेषंदिनमानेन युक्तं ॥ ३१।२४ जाताः ८९।४४ एताआभ्यः अधिका अतोत्र प्रतिपद्येव चंद्रदर्शनं ॥ अथभौमादीनांवक्रमार्गोदयास्तसाधनं ॥ अंतिमशीघ्रफलसाधनेयच्छीघ्रकेंद्रंतस्यचक्रशुद्धस्यांशाः कार्याः प्रोक्तांशानांइष्टांशानांचसाम्ये तस्मिन्नेवदिनेवक्रादिकंस्यात् ॥ न्यूनाधिकेयदिवमानयनंप्रोक्तेष्टांशानामंतरकलाः कार्याः शीघ्रकेंद्रगत्या भाज्याः ॥ लब्धंदिनघटीपलाद्यंग्राह्यंप्रोक्तांशोभ्य इष्टकेंद्रांशा अधिकाश्चेत्सादालब्धेन अवधिस्थंवारादिकंरहितंकार्यं ॥ न्यूनेनसहितंकार्यं ॥ तद्वारघटीपलेषु वक्रादिकंस्यात् ॥ अस्तोदयाविति दिवाकरपद्यं ॥ भपादेति दिवाकरपद्यं ॥ वैशाखशुक्ल ५ शनावधःस्थो भौमः ॥ ३।२६।११।२१ आश्लेषाचतुर्थचरणे भौमः ३।२८।५० अनयोरंतरं कलाः २८।११ अवधिस्थभौमगत्या २१।२३ भक्ताः फलंदिनादिकं १।५७।४१ इ-

दमवधिस्यवारादी०।४६।२४युतं २।४३।४७ भपादजं भौमात् अवधिस्यस्यन्यूनत्वात् ॥ एवं वैशाखशुक्लसप्तम्यांसोमेसूर्योदयाद्गत
घटीषु २ फलेषु ४५ तदानुराधानुर्थपादेभौमः ॥ अथचंद्रग्रहणं ॥ पौर्णिमांतेयद्विद्यमाननक्षत्रंतस्यगतैष्यघटिकायोगः कार्यः ॥ तत्तुल्यघटि
काधःस्यंचंद्रविंवपातविंवनाम भूभाविंवंग्राह्यं ॥ अग्रिमांतरेणशेषफलादिगुण्यानि ॥ षष्टयाभक्तेन लब्धांगुलैरग्रिमकोष्टकवशात् सं
स्कारः ॥ हितरहितानिकार्याणि ॥ अंगुलात्मकंचंद्रविंवं ॥ भूभाविंवंचभवति ॥ अथभूभायाः संस्कारः ॥ पौर्णमास्यांयद्राशौसूर्यसंक्रातिरस्ति
तद्राश्यधःस्यमंगुलादिकंपातफलंस्थाप्यं ॥ अग्रिमांतरेणसूर्यस्य भागाद्यंगुण्यं ॥ त्रिंशताभाज्यंव्यंगुलात्मके फलेन अग्रिम कोष्टकव
शाद्धितान्वितंकार्यं ॥ अनेनभूभायुताकार्या ॥ साम्प्रतं भवतिपातफलंसदाधनतदनंतरंरविचन्द्रयोर्विंवयोर्योगार्धकार्यं ॥ तन्मानैक्यखंडंश
रनि ॥ तत्शरोनंकार्यंग्रासीमानि ॥ उदाहरणं ॥ शक १५३४ वैशाखशुद्ध १५ सोमेघटि ५४।४० अनुराधानक्षत्रस्य ॥ गतैष्ययोग ५८।३६
सूर्य १।६।२०।३७ चंद्र ७।६।३४।२५ राहुः २।१४।१८।११ अष्टपंचाशत् घटिकाधःस्यंचंद्रविंवं ११।१० अग्रिमांतरेण ११ शेषं गुणितं ३९
।६ षष्टयाभक्तंफलेन संस्कृतंजातंचंद्रविंवं ११।४ भूभाविंवं २६।१६ अनुपातफलेन २२ संस्कृतः २७।५४ वृषसंक्रात्यधःस्यफलं०॥
३ अग्रिमांतरेण ॥ ६॥ शेषंगुणितं ३४।३७ जातं ३१ त्रिंशद्भक्तंफलेन १ संस्कृतं०।२२ अनेन भूभायुताजातास्पष्टाभूभा २८।१६ अन
योर्योगार्धं जातंमानैक्यखंडं ॥ १९।४५ अथशरसाधनं ॥ पर्वांतकालीनः सपातात् चंद्रः कार्यः ॥ अथवाविराहुश्चन्द्रकार्यः ॥ षड्भिःषेद्गुणा
द्विशोध्य ॥ न्यूनोयथास्थितएव ॥ तस्यांशा कार्याः षड्भिर्भक्ता कार्या लब्धमभितकोष्टकस्यः अंगुलाद्यः शरोग्राह्यः ॥ अग्रिमांतरेण शे
षंगुण्यंषट्भक्तंलब्धांगुलैः संस्कार्यः अंगुलात्मकः शरोभवति ॥ उदाहरणं ॥ विराहुश्चंद्रःतस्यांशाः १७।२।१६।१४ षड्भक्ताः फलं २८
।१८।४६ शरः अनुपातफलेन ६।२७ संस्कृताजाताः शरांगुलादिः १२।६ अनेनरहितंमानैक्यखंडंजातोग्रासः ७।३९ अथःस्थि

त्यानयनं ॥ ग्रासस्यांगुलप्रमितकोष्ठकादधःस्थास्थितिःस्थाप्या अग्रिमांतरेणांगुलानि गुण्यानि षष्टि भक्तः लब्धपलैः सहिताः कार्याः घटिकादिः स्थितिः स्यात् ॥ उदाहरणं ॥ ग्रासः ७।३१ स्थितिः २।३५ अनुपातफलेन ॥७॥ सहिताजाता घटिकादिस्थितिः ॥ २।४२ अन्यदवशिष्टकरणोक्तरीत्यासाध्यम् ॥ इति चंद्रग्रहणं ॥ अथसूर्यग्रहणं ॥ शकः१५ ३२ मार्गशीर्षकृष्ण ३० बुधे घ. टि ११।५९ सूर्यः ८।५२।६।२८ लग्नं१।२।५।३४ त्रिभोनंअमावास्यायत्संक्रांतौ भवतितत्संक्रांतिराश्यधस्थसूर्यबिंबंस्थाप्यं ॥ अग्रिमांतरेणसूर्यस्य भागाद्यं गुण्यंत्रिंशद्भक्तं अंगुलात्मकंफले अग्रिमकोष्ठकवशाद्धीनान्वितंकार्यं ॥ अंगुलाद्यं सूर्यबिंबं भवति ॥ उदाहरणं ॥ धनुराशौ सूर्यबिंबं ११।४५ आयातव्यंगुलैः संस्कृतं ज्ञातंरविबिंबं ११२८ अथलंबनं ॥ त्रिभोनलग्नार्कांतरांशाः ॥ तेयथाराशित्रयात्याभवन्तितथाकार्याः ॥ तदनंतरषड्भिर्भाज्याः लब्धप्रमितपञ्चदशाधःस्थघटिकादिलंबनंग्राह्यं ॥ अग्रिमांतरेणशेषंगुण्यंषड्भिर्भाज्यंलब्धःपलैः सहितंघटिकादिलंबनंस्यात् ॥ सूर्यात्त्रिभोनलग्नेऽधिकेसतिधनं ॥ न्यूनेनऋणंज्ञेयं ॥ उदाहरणं ॥ त्रिभोनलग्नार्कांतरांशाः॥ ३।२०।४६ षड्भिर्लब्धंशून्यं ॥ शून्यादधःस्थंघटिकादिलंबनं०।१।० अग्रिमांतरेण२४।२५ शेपं३।२०।४६ गुणितं८१।४२।३ षड्भिर्भक्तं लब्धं पलादिकैः १३।५८ सहितंजातं घटिकादिलंबनं ०।१४ अन्यदवशिष्टंपूर्ववत् ॥ एतत्पंचदशकोष्ठकस्थलंबनस्यांकोपरि ग्रहणं स्थूलं ॥ क्रान्तिसाधनमाह ॥ सायनग्रहस्य भुजांशाः कार्याः ॥ षड्भिर्भाज्याः लब्धप्रमितकोष्ठकस्थांघटिकाद्याक्रान्तिःस्थाप्या ॥ लम्बनवदनुपातः कार्यः ॥ तदनन्तरंषड्गुणिताः कार्याः भागादिक्रान्तिःस्यात् ॥ उदाहरणं ॥ सूर्यः ८।५।२६।२० अयनांशाः२६।२१ ।५४ सायनःसूर्यः ९।२२।६।१४ अस्य भुजांशाः ८२।६।१४ षड्भक्ताः लब्धं १३ घटिकादिक्रान्तिः ३।५४।२६ पलात्मकेनानुपातेन २।४४ सहिता ३।५७।२० षड्गुणिताजाता भागाद्याक्रान्तिः २३।४५ ग्रन्थकर्त्रा एते पंचदशकोष्ठकस्थालंबनस्यांकाः अन्ये पंचदश

कोष्ठेषुविपरीताः स्थापिताः ॥ एवंविंशत्कोष्ठेषुक्रान्त्यंकाजाताः ॥ अस्योपरिक्रान्तिसाधनं ॥ सायनग्रहः षड्भाधिकश्चेच्चक्राद्विशोध्यः त-
स्यांशाः कार्याः षड्भिर्भाज्याः लब्धकोष्ठकस्याघटिकादिक्रान्तिः ॥ पूर्ववत्सानुपातात् ग्राह्याः अत्रानुपातफलं अग्रिमकोष्ठवशात् ना-
तिनिष्कार्यं ॥ इयंक्रान्तिः पूर्वेणसदृतुल्या ॥उदाहरणं ॥ सायनसूर्यः ८।२२।१६।१४ भगणा१२ च्युता ३।७।४३।४६ अंशाः ९७।४३।४६ षड्भ-
क्ताः फलं १६ क्रान्तिः २३।५८।३६ अनुपातफलेन १।१६ रहितापड्गुणितासैवक्रान्तिः २३।४४।० अथसूक्ष्मक्रान्तिसाधनं ॥ सायनग्रहस्य भु-
जांशप्रमितकोष्ठकस्याभागाद्याक्रांतिः स्थाप्या ॥ अग्रिमांतरेणकलाद्यंगुण्यंषष्ट्याभागेनकलात्मकेनफलेनसहितंकार्यं भागाद्याक्रांतिः
स्यात् २३।४५।७८ अथशरसाधनं ॥ सपातचन्द्रस्य ॥ अथवाविराहुश्चन्द्रस्य भुजांशप्रमितकोष्ठकस्थः कलादिः शरोग्राह्यः अग्रिमांतरे
णशेषंगुण्यंषष्ट्याभाज्यंविकलात्मकेनफलेनसहितंकार्यंकलादिबाणः स्यात् ॥ त्रिभिर्भाज्योंगुलादिः स्यात् ॥उदाहरणं ॥ विराहुश्चन्द्रस्यभु-
जांशाः ७।४३।४६ शरः २२।५३ अनुपातफलेन ३।२४ सहितोजातः कलादिः शरः २६।१७ त्रिभिर्भक्तोजातोंगुलाद्यः शरः १२।५ अथोन्न-
तांशोपरिद्वादशांगुलशंकोः छायासाधनं ॥ उन्नतांशप्रमितकोष्ठकाद्यः स्थाप्यः अग्रिमांतरेणशेषंगुण्यंषष्ट्याभाज्यंफलेनाग्रिमकोष्ठक
वशात्सहितंरहितंकार्यम् ॥छायाभवति ॥ अथाश्विन्यादीनांनक्षत्राणांउदयमध्यास्तलग्नज्ञानं ॥ अश्विन्युदयेमेषलग्नंराश्यादि ०।१।
२६।५ रवेर्मध्यस्थितकर्कलग्नंराश्यादि ॥ ३।१४।३६ अस्तमयेतुलग्नंराश्यादि ६।१२।५८ एवंभरण्यादिषुज्ञेयं ॥ इतिविश्वनाथ
विरचितं मकरन्दस्योदाहरणं ॥ अथसंवत्सरवर्षानयनमाह ॥ तत्रादौसंवत्सरानयनमाह ॥ शकार्कोदु ३५१४ वियुक् शकोनग ७
गणः शून्यांबरांगोद्धृतो ६०० । भाद्यंलब्धमिताब्दवेददहनाद्यं ३४ साप्तसूपेंदुतः ॥ दिग्भागासकलायुतं प्रभवतोब्दः परिशोध्यास्तू-
ताः शेषांशारविभिर्हतादिनमुखंमेषार्कतः प्राग्भवेत् ॥१ ॥उदाहरणं ॥ शकः १५।५६ अनेन १५१४ रहितः जातागताब्दाः ४२

ससभिर्गुणिताः २९४ शून्यांबरांगो ६०० हृतः फलंराश्यादि ०।०।१४।४२।० राशिस्थानेगताब्द ४२ वेददहनाभ्यांयुतः ७६। १४।
४२।० गताब्दयुनश्चंद्रेषुतः १५८ दिग्नागा ८० सकला १५।४८ युतं ७६।१४।५७।४८ ऊर्ध्वांकः षष्टघातष्टः शेषांकः १६ गतवत्स-
रोज्ञेयः वर्त्तमानः सुभानुसंवत्सरशेषं १४।५७।४८ द्वादशभिर्गुणितञ्जातंदिनादिकं १७९।३३।३६ दिनस्थानेत्रिंशद्भक्तं
जातंमासादिकं ५।२९।३३।३६ एभिर्मासादिकैर्वर्त्तमानवर्षस्थमेषसंक्रांति सकाशात् पूर्वं प्रवृत्तः सुभानुवत्सरः इदं द्वादश-
मध्येशोधितेशेषं ६।०।२६।२४ एवंवर्त्तमानतुलांशकः ०।२६।२४ यावत्सुभानुवत्सरः ॥ तदनन्तरं तारणाख्यः ॥ एवं वर्षग-
ध्येद्वयोः फलंलेख्यं ॥ दाक्षिणात्याः नर्मदायाः दक्षिणेभागे मनुजमानेन संवत्सर प्रवृत्तिमाहुः ॥ उक्तंच ॥ नर्मदोन्तरभा-
गेस्याद्गुरुमानेनवत्सरः ॥ नर्मदायाम्यभागेतु मनुमानाद्बुधैःस्मृतः ॥ तदानयनं ॥ शालिवाहनशाकोर्कसंयुतः षष्टिहृत् प्रभव-
पूर्वंवत्सरमनुमानेन ॥ अथगुरूदयात्गुरुवर्षज्ञानमाह स्याद्दूर्जादिपुमासेपुवन्हिभादिद्वयंद्वयं ॥ उपांत्यपंचमांतेपुनक्षत्रा
णांत्रयंत्रयं ॥ अभिनान्तुदिनोजीवस्तन्नक्षत्राख्यवत्सरः ॥ तद्यथा ॥ यस्मिन्समयेगुरोरुदयः तस्मिन् समयेयस्मिन् नक्षत्रेगुरु
स्तिष्ठति तन्नक्षत्रस्ययोमासः सगुरुवर्षसंज्ञकोज्ञेयः ॥ कृत्तिकारोहिणीस्थितोगुरुः सूर्यसान्निध्यादुदयंप्राप्तस्तदा कार्तिक
संज्ञकंगुरुवर्षंज्ञेयं ॥ मृगार्द्रयोर्मार्गशीर्षं॰ ॥ पुनर्वसुपुष्ययोः पौषं ॥ श्लेषामघयोर्माघं ॥ पूर्वोत्तराभाद्रस्तेपुफाल्गुनः ॥ चित्रा
स्वात्योश्चैत्रं ॥ विशाखानुराधयोर्वैशाखं॰ ॥ ज्येष्ठामूलयोर्ज्येष्ठसंज्ञं॰ ॥ पूर्वोत्तराषाढयोराषाढं॰ ॥ हरिवासवयोः श्रावणं॰ ॥
शततारकापूर्वाभाद्रपदोत्तराभाद्रपदस्तुभाद्रं ॥ रेवत्यश्विभरणीनामाश्विनसं॰ ॥ तत्रपंचमः फाल्गुनः अंत्य आश्विनः उपांत्यो-
भाद्रपदस्तेषुप्रत्येकंनक्षत्रत्रययोगोज्ञातव्यः ॥ सूर्यसिद्धांतवचनादस्तमयनक्षत्रादपि गुरुवर्षंज्ञेयमिति ॥ अथास्तमयोदयन-

क्षत्रमेकमेववाहुल्येनभवति। तथापिकदाचिद्द्विसंवादेउदयास्तमादिति उभयनक्षत्रोपादानादुभययुतानिमिश्रीभावेनवक्तव्यानि॥
गुरूदयादिनमारभ्योपक्रमइत्यहर्गणः॥ प्रशंसन्तिसहस्रेणसहितोयुगपद्गुरुः॥ तस्मात्कालादद्दृश्यःस्यात्पूर्वस्त्वाब्दःप्रवर्त्तते॥ ऋक्षपू
र्वइतिवचनात्॥ कार्तिकादयोगुरूदयादब्दाउदितदिवसात्॥ माघवोदयस्तुमध्यमगुरुराशिभोगादितिविवेकः॥ बहुसंमतत्वात् ॥ गुरुदया
द्गुरोरब्दविचारणात्कर्त्तव्येत्यर्थः॥ गुर्वब्दफलंगुरूदयादग्रिमगुरूदनपर्यंतंज्ञेयं॥ यस्मिन्वर्षेगुरूदयेपुनर्वसुनक्षत्रेगुरुस्तिष्ठतिइतिकारणात् द्व
द्पोपसंज्ञकंगुरुवर्षंतस्यफलंलेख्यं॥ अथराजादिनिर्णयः॥ चैत्रादिमेषादिकुलीरतौलिमृगाख्यमार्द्राधनुरादिवाराः॥ राजाचमूपस्सस्यरसा-
धिपाश्चसस्युर्नीरसेशाबुधिधान्यनाथाः॥१॥ प्रतिपदियदिचैत्रेशुक्लपक्षेभवेत्तांकथमपियदिवारौद्वौतदाभूपतिःकः॥ प्रथमदिवसवारःकीर्ति-
तोगर्गमुख्यैर्गणयतिसतिडिंभेराज्यभाग्ज्येष्ठएव॥२॥ डिंभोबालः॥ पोतःपाकोर्भकोडिंभइत्यभिधानात्॥ कांबोजादिदेशेषुविशेषउक्तः॥
कांबोजस्वार्गूरकिरातसिंधुदेशेषुविल्वेष्वपिदर्दुरेषु॥ किंत्वप्रमध्यान्हगतोब्दपःस्यादन्येषुसूर्योदयगोदिनेशः॥ अन्यच्च॥ प्रतिपद्दर्शसंधिश्चम-
ध्यान्हात्पूर्वतोयदि॥ तदातद्दिनपोराजापरतश्चेत्परोभवेत्॥ अत्रकेचिच्चांद्रवर्षस्यप्रतिपदादिदाक्षिणेवर्षप्रवेशात्तत्रत्यएववारोवर्षेशइत्याहुः
पदंतिच॥ फाल्गुनांतेकुम्हराजेति॥ तदेतद्गुर्जरदेशेप्राचुर्येणवर्तते॥ दाक्षिणात्याऔदयिकप्रतिपद्वारमेवराजानमाहुः॥ कश्यपः॥ चैत्रशु-
क्लाद्यदिवसेकिंत्वप्रेववकेथवा॥ अर्कोदयोत्तुयोवारः सोब्दपः परिकीर्तितः॥ चैत्रशुक्लप्रतिपद्दिवसेयोवारःसराजा॥ मेषसंक्रांतिदिव-
सेयोवारः समंत्री॥ कर्कसंक्रांतिदिवसेयोवारः ससस्याधिपः॥ तुलासंक्रांतिदिवसेवारःसरसाधिपः॥ मृगसंक्रांतिदिवसेयोवारोनीरसाधिप
॥आर्द्राप्रवेशदिवसेयोवारः समेघाधिपः॥ धनुःसंक्रांतिदिवसेयोवारः सपश्चिमधान्याधिपः॥ एतेषांफलानिक्रमतोलेख्यानि॥ तदनंतरं॥ य
स्यांतिथौयस्मिन्वारेयस्मिन्नक्षत्रेयस्मिन्योगेआर्द्राप्रवेशस्तत्फलानिलेख्यानि॥ दिवारात्रौवाप्रवेशस्तत्फलंलेख्यं॥ अथनवमेघानयनं॥ गताब्दान

वभिस्तष्टशेषंहाराद्विशोधयेत् ॥ ततश्चावर्तसंवर्तद्रोणपुष्करकीलकः;नीलश्चवरुणोवायुस्तमोमेघाः स्मृतानव ॥ अत्रगताब्दानयनं ॥ युग्मचंद्रशर
मंदनिर्हीनाशालिवाहनशकान्स्ताः समाः ॥ उदाहरणं ॥ शकः १५५६ अनेन १५५२ रहिताजातागताब्दाः ४४ नवभिस्तष्टशेषं ८ हारात्शोधितं १
आनर्तसंज्ञकोमेघस्तत्फलं लेख्यांकेविन्दुभेषचतुष्टयमाहुस्तदानयनंचत्रिभिर्गताब्दाःसहिताश्चतुर्भिः शेषंभवेदंबुपतिः क्रमेणआवर्तसंवर्तक
पुष्करश्चद्रोणश्चतुर्थोमुनिभिः प्रदिष्टः । अत्रापिपूर्ववद्गताब्दानयनं ॥ आवर्तेछिन्नवृष्टिः स्यात्संवर्तेजलपूरिता ॥ पुष्करेमंदवृष्टिःस्यात्
द्रोणोवर्षनिसर्वदा ॥ अथद्वादशनागानयनं ॥ गताब्दाद्वियुताः सूर्यभक्तास्तत्रावशेषिताः ॥ सबुद्धोनंदमारीचकर्कोटकपृथुश्रवाः ॥ वा
सुकिस्तक्षकश्चैवकंबलाश्वतरावुभौ ॥ हेममालीनरेंद्रश्चवज्रदंष्ट्रोरषस्तथा ॥ अत्रापिपूर्ववद्गताब्दाज्ञेयाः ॥ उदाहरणं ॥ गताब्दाः ४४
द्वियुताः ४६ द्वादशभिस्तष्टाःशेषं १० नरेंद्रसंज्ञकोनागस्तत्फलं ॥ केचित्तुनागाष्टकमाहुस्तदानयनं ॥ शाकोरसाद्रिसंयुक्तोवसुभिः
भागशेषकः ॥ अनन्तादिक्रमेणैव अष्टौनागाः प्रकीर्तिताः ॥ अनन्तोवासुकिः पद्मोमहापद्मः सुतक्षकः ॥ कुलीरः कर्कटः शङ्ख
श्चाष्टौनागाः प्रकीर्तिताः ॥ अथसप्तवातानयनं ॥ शाकः शशांकसंयुक्तोमुनिभिर्भागहारितः ॥ आवहादिक्रमेणैवसप्तवाताः प्रकी
र्तिताः ॥ आवहः प्रवहश्चैवसंवहोविवहस्तथा ॥ उद्वहोतिवहश्चैवसप्तवाताः प्रकीर्तिताः ॥ अथवर्षादिनामानयनं ॥ महादेवः
॥ शाकः त्रिगुण्योनगभाजितश्चशेषंद्विनिघ्नंशरसंयुतंच ॥ लब्धंचशाकश्चपुनः प्रकल्प्य पूर्वोक्तवत्स्युः खलु विश्वकाख्याः ॥
वर्षाचधान्यंतृणशीततेजोवायुश्चवृद्धिक्षयविग्रहौच ॥ एवंनचाभिहितानि ॥ उदाहरणं ॥ शाकः १५५६ त्रिगुणः ४६६८ सप्त
भक्तः लब्धं ६६६ शेषं ६ द्विगुणं १२ शर ५ संयुतः १७ एतेजाताविश्वकाख्यावर्षाः १७ लब्धं ६६६ त्रिभिर्गुणितं ॥ १९९८ सप्त
भक्तं २८५ शेषं ३ द्विनिघ्नं ६ शर ५ युतंजातंधान्यंएवंलब्धोपरिसर्वंज्ञेयं ॥ तृणं ७ शीतं १ तेजः १ वायुः ११ वृद्धि १७ क्षयः

उदा

१ विग्रहः ११ ॥ शाकञ्चवेदगुणितंसप्तभिर्भागमाहरेत् ॥ शेषंद्विघ्नंत्रिभिर्युक्तं प्रोक्तंविश्वाख्यसंज्ञकं ॥ क्षुधातृषातथानिद्रा
चालस्यंचोद्यमस्तथा ॥ शांतिःक्रोधस्तथा दंभोलोभो मैथुनमेवच ॥ ततस्तुरसनिष्पत्तिःफलनिष्पत्तिरेवच ॥ उत्साहः सर्वलोकानां
ज्ञातव्यंनिश्चितंबुधैः ॥ त्रयोदशोदाहरण ॥ शकः १५५६ चतुर्गुणिताः ॥ ६२२४ सप्तभक्तः लब्धं ८८९ शेषं १ द्विघ्न २ त्रियुतं ५
जाताक्षुधा ॥ पुनर्लब्धं ८८९ चतुर्गुणं ३५५६ सप्त ७ भक्तं लब्धं ५०८ शेषं ० त्रियुतं तृषा ३ एवंलब्धोपरिसर्वत्रज्ञेयं निद्रा ७ आ-
लस्य १३ उद्यमः ७ शांतिः १३ क्रोधः ७ दम्भः ५ लोभः १३ मैथुनं १५ रसोत्पत्तिः १५ फलानि ५ उत्साहः ११ शाकाब्दंवसुभिर्निघ्नं
नवभिर्भागमाहरेत् ॥ शेषंतु द्विगुणीकृत्यरूपमत्रापियोजयेत् ॥ उग्रंपापंचपुण्यंच व्याधिव्याधि विनाशनं ॥ आचारश्चाप्यनाचा-
रोमरणंजनिरेवच ॥ देशस्योपद्रवस्वास्थ्यंचौराकुल भयंतथा ॥ अथैषांपञ्चदशानामुदाहरणं ॥ शकः १५५६ अष्टगुणः १२४४८
नवभिर्भक्तः लब्ध १३८३ शेषं १ द्विनिघ्नं २ रूपं १ योज्यं १ जातंउग्रं २ एवंलब्धोपरिसर्वत्र ज्ञेयम् ॥ उग्रपापइत्यादिना अग्निनाशप-
र्यंतंपंचदशज्ञेयाः ॥ शकः पञ्चभिःसप्तभिर्गोभिरीशैश्चतुर्धाहतःसप्त भक्तावशिष्टः ॥ द्विनिघ्नंत्रिभिर्युक्तमुद्भिज्जराय्वंडजस्वेदजानां
द्विविंशोपका स्युः ॥ उदाहरणं ॥ शकः १५५६ चतुर्धास्थाप्यः १५५६ क्रमेणगुणकैर्गुणितः ७७८० । १०८९२ ॥ १४००४ ॥ १७११६ सर्वत्र
सप्तभक्ते शेषाणि ३ । ० । ४ । १ द्विगुणितानि ६ । ० । ८ । २ त्रिभिर्युक्तानिजातानिविंशोपकाः ॥ ९ । ३ । ११ । ५ उद्भिज्जाः ९ जरायुजाः ३ अंडजाः ११
स्वेदजाः ५ एतत्स्वरूपंअमरसिंहेनोक्तं ॥ उद्भिज्जाः तरुगुल्माद्या पक्षिसर्पादयोंडजाः ॥ स्वेदजाः कृमिदंशाद्या नृगवाद्याजरायु-
जाः ॥ अथरोहिणीचक्रं ॥ मेषार्कदिनमाद्यर्क्षद्वयमब्धौन्यसेत्तटे ॥ एकंगिरौद्वयंसंधौचतुर्दिक्षुतथान्यसेत् ॥ साभिजिन्नक्रमेणैव फलं
यत्ररोहिणी ॥ अतिवृष्टिः समुद्रेस्यात् तटेवृष्टेरवर्षणं ॥ गिरौसंधौखंडवृष्टिरित्याहुः पूर्वसूरयः ॥ अथाब्दपानयनं ॥ भूनंदति

इति मकरन्दसारिणी उदाहरणसहसमाप्ता